तर्कसङ्ग्रहः

Tarkasaṅgrahaḥ

श्रीमदन्नम्भट्टविरचितः

Śrīmadannambhaṭṭaviracitaḥ

नीयल्डेल्मानिकोनाम्ना पण्डिताभिमानिना सम्पादितः

December 18, 2001

Contents

Chapter 1

मङ्गलाचरणम्

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।
बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः॥ १॥

Chapter 2

प्रत्यक्षखण्डम्

2.1 उद्देशप्रकरणम्

द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्तपदार्थाः॥ २॥

तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव॥ ३॥

रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धि-
सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः॥ ४॥

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्मानि॥ ५॥

परमपरं चेति द्विविधं सामान्यम्॥ ६॥

नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव॥ ७॥

समवायस्त्वेक एव॥ ८॥

अभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति॥ ९॥

2.2 द्रव्यलक्षणप्रकरणम्

तत्र गन्धवती पृथिवी।सा द्विविधा नित्याऽनित्या च। नित्या परमानुरूपा। अनित्या कार्यरूपा। पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात्। शरीरमस्मदादीनाम्। इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति। विषयो मृत्पाषाणादि॥ १०॥

शीतस्पर्शवत्य आपः। ता द्विविधाः नित्या अनित्याश्च। नित्याः परमानुरूपाः। अनित्याः कार्यरूपाः। पुनस्त्रिविधाः शरीरेन्द्रियविषयभेदात्। शरीरं वरुणलोके। इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति। विषयः सरित्समुद्रादिः॥ ११॥

उष्णस्पर्शवत् तेजः। तच्च द्विविधं नित्यमनित्यं च। नित्यं परमानुरूपम् । अनित्यं कार्यरूपम्। पुनस्त्रिविधं शरीरेन्द्रियविषयभेदात् । शरीरमादित्यलोके प्रसिद्धम्। इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति। विषयश्चतुर्विधो भौमदिव्योदर्याकरजभेदात्। भौमं वह्न्यादिकम्। अबिन्धनं दिव्यं विद्युदादि। भुक्तस्य परिणामहेतुरुदर्यम्। आकरजं सुवर्णादि॥ १२॥

रूपरहितः स्पर्शवान् वायुः। स द्विविधः नित्योऽनित्यश्च। नित्यः परमानुरूपः। अनित्यः कार्यरूपः। पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति।विषयो वृक्षादिकम्पनहेतुः। शरीरान्तःसञ्चारी वायुः प्राणः। स चैकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते॥ १३॥

शब्दगुणकमाकाशम्।तच्चैकं विभु नित्यं च॥ १४॥

अतीतादिव्यवहारहेतुः कालः।स चैको विभुर्नित्यश्च॥ १५॥

प्राच्यादिव्यवहारहेतुर्दिक्।सा चैका नित्या विभ्वी च॥ १६॥

ज्ञानाधिकरणमात्मा। स द्विविधः जीवात्मा परमात्मा चेति । तत्रेश्वरः सर्वज्ञः। परमात्मा एक एव जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च॥ १७॥

सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमानुरूपं नित्यं च॥ १८॥

2.3 गुणलक्षणप्रकरणम्

चक्षुर्मात्रग्राह्यो गुणो रूपम्।तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधम्। पृथिवीजलतेजोवृत्ति।तत्र पृथिव्यां सप्तविधम्। अभास्वरशुक्लं जले भास्वरशुक्लं तेजसि॥ १९॥

रसनाग्राह्यो गुणो रसः। स च मधुराम्ललवणकटुकषायतिक्तभेदाद्षड्विधः। पृथिवीजलवृत्ति। तत्र पृथिव्यां षड्विधः। जले मधुर एव॥ २०॥

घ्राणग्राह्यो गुणो गन्धः। स द्विविधः सुरभिरसुरभिश्च। पृथिवीमात्रवृत्तिः॥ २१॥

त्वगिन्द्रियमात्रग्राह्यो गुणो स्पर्शः।स च त्रिविधः शीतोष्णानुष्णाशीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्णस्तेजसि। उनुष्णाशीतः पृथिवीवाय्वोः॥ २२॥

रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च अन्यत्रापाकजं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्॥ २३॥

एकत्वादिव्यवहारहेतुः सङ्ख्या। सा नवद्रव्यवृत्तिः। एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। द्वित्वादिकं तु सर्वत्राऽनित्यमेव॥ २४॥

मानव्यवहारासाधारणकारणं परिमाणम्। नवद्रव्यवृत्ति। तच्चतुर्विधमणुमहद्दीर्घं ह्रस्वं चेति॥ २५॥

पृथग्व्यवहारासाधारणकारणं पृथक्त्वम्। सर्वद्रव्यवृत्ति॥ २६॥

संयुक्तव्यवहारहेतुः संयोगः। सर्वद्रव्यवृत्तिः॥ २७॥

संयोगनाशको गुणो विभागः। सर्वद्रव्यवृत्तिः॥ २८॥

परापरव्यवहारासाधारणकारणे परापरत्वे। पृथिव्यादिचतुष्टयमनोवृत्तिनी। ते च द्विविधे दिक्कृते कालकृते चेति। दूरस्थे दिक्कृतं परत्वम् समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वं कनिष्ठे कालकृतंअपरत्वम्॥ २९॥

आद्यपतनाऽसमवायिकारणं गुरुत्वम्। पृथिवीजलवृत्ति॥ ३०॥

आद्यस्यन्दनाऽसमवायिकारणं द्रवत्वम्। पृथिव्यप्तेजोवृत्ति। तद्विविधं सांसिद्धिकं नैमित्तिकं च। सांसिद्धिकं जले। नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वं तेजसि सुवर्णादौ॥ ३१॥

चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः। जलमात्रवृत्तिः॥ ३२॥

श्रोत्रग्राह्यो गुणः शब्दः।आकाशमात्रवृत्तिः। स द्विविधो ध्वन्यात्मको वर्णात्मकश्च। तत्र ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः॥ ३३॥

सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्। सा द्विविधा स्मृतिरनुभवश्च॥ ३४॥

संस्कारमात्रजन्यं ज्ञानं स्मृतिः॥ ३५॥

तद्भिन्नं ज्ञानमनुभवः। स द्विविधो यथार्थोऽयथार्थश्च॥ ३६॥

तद्वति तत्प्रकारकोऽनुभवो यथार्थः (यथा रजते इदं रजतमिति ज्ञानम्) सैव प्रमेत्युच्यते॥ ३७॥

तदभाववति तत्प्रकारकोऽयथार्थः (यथा शुक्तौ इदं रजतमिति ज्ञानम्) सैवाप्रमेत्युच्यते॥ ३८॥

यथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमित्युपमितिशाब्दभेदात्॥ ३९॥

तत्करणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशाब्दभेदात्॥ ४०॥

असाधारणं कारणं करणम्॥ ४१॥

कार्यनियतपूर्ववृत्ति कारणम्॥ ४२॥

कार्यं प्रागभावप्रतियोगि॥ ४३॥

कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात्॥ ४४॥

यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यथा तन्तवः पटस्य पटश्च स्वगतरूपादेः॥ ४५॥

कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत्कारणमसमवायिकारणम्। यथा तन्तुसंयोगः पटस्य तन्तुरूपं पटरूपस्य॥ ४६॥

तदुभयभिन्नं कारणं निमित्तकारणम्। यथा तुरीवेमादिकं पटस्य॥ ४७॥

तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम्॥ ४८॥

2.4 प्रत्यक्षलक्षणप्रकरणम्

तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम्॥ ४९॥

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् (ज्ञानकरणकं ज्ञानं प्रत्यक्षम्)। तद्द्विविधं निर्विकल्पकं सविकल्पकं चेति॥ ५०॥

तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्। यथा किञ्चिदिदमिति॥ ५१॥

सप्रकारकं ज्ञानं सविकल्पकम्।यथा डित्थो ब्राह्मणोऽयं श्यामोऽयमिति॥ ५२॥

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषणविशेष्यभावश्चेति॥ ५३॥

चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः॥ ५४॥

घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः चक्षुःसंयुक्ते घटे रूपस्य समयायात्॥ ५५॥

रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः समवायात्॥ ५६॥

श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः कर्णविवरवर्त्याकाशस्य श्रोत्रत्वाच् छब्दस्याकाशगुणत्वाद्गुणगुणिनोश्च समवायात्॥ ५७॥

शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः श्रोत्रसमवेते शब्दे शब्दस्य समवायात्॥ ५८॥

अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात्॥ ५९॥

एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं तत्करणमिन्द्रियं तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्॥ ५९॥

इति प्रत्यक्षपरिच्छेदः

Chapter 3

अनुमानखण्डम्

अनुमितिकरणमनुमानम्॥ ६०॥

परामर्शजन्यं ज्ञानमनुमितिः॥ ६१॥

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः॥ ६२॥

यत्र यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः॥ ६३॥

व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता॥ ६४॥

अनुमानं द्विविधं स्वार्थं परार्थं च॥ ६५॥

स्वार्थं स्वानुमितिहेतुः, तथाहि स्वयमेव भूयो दर्शनेन यत्र यत्र धूमस्तत्र तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति — यत्र यत्र धूमस्तत्र तत्राग्निरिति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात्पर्वतो वह्निमानिति ज्ञानानुमितिरुत्पद्यते तदेतत् स्वार्थानुमानम्॥ ६६॥

यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानम्। यथा — पर्वतो वह्निमान्धूमवत्त्वाद्यो यो धूमवान्स स वह्निमान्यथा महानसं तथा चायं

तस्मात्तथेति। अनेन प्रतिपादिताल्लिङ्गात्परोऽप्यग्निं प्रतिपद्यते॥ ६७॥

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। पर्वतो वह्निमानिति प्रतिज्ञा। धूमवत्त्वादिति हेतुः। यो यो धूमवान्स स वह्निमानित्युदारणम्। तथा चायमित्युपनयः। तस्मात्तथेति निगमनम्॥ ६८॥

स्वार्थानुमितिपरार्थानुमानमित्योर्लिङ्गपरामर्श एव करणम्। तस्माल्लिङ्गपरामर्शोऽनुमानम्॥ ६९॥

लिङ्गं त्रिविधमन्वयव्यतिरेकि केवलान्वयै केवलव्यतिरेकि चेति। अन्वयेन व्यतिरेकेण च व्याप्तिमन्वयव्यतिरेकि यथा वह्नौ साध्ये धूमवत्त्वम्। यत्र धूमस्तत्राग्निर्यथा महानसमित्यन्वयव्याप्तिः। यत्र वह्निर्नास्ति धूमोऽपि नास्ति यथा ह्रद इति व्यतिरेकिव्याप्तिः॥ ७०॥

अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा घटोऽभिधेयः प्रमेयत्वात्पटवत्। अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्यापि प्रमेयत्वादभिधेयेत्वाच्च॥ ७१॥

व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वाद्यदितरेभ्यो न भिद्यते न तद्गन्धवद्यथा जलम्। न चेयं तथा तस्मान्न तथेति। अत्र यद्गन्धवत्तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात्॥ ७२ ॥

सन्दिग्धसाध्यवान् पक्षः। यथा धूमवत्त्वे हेतौ पर्वतः॥ ७३॥

निश्चितसाध्यवान् सपक्षः। यथा तत्रैव महानसम्॥ ७४॥

निश्चितसाध्याभाववान् विपक्षः। यथा तत्रैव महाह्रदः॥ ७५॥

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः॥ ७६॥

सव्यभिचारोऽनैकान्तिकः स त्रिविधः साधारणासाधारणानुप्संहारिभेदात्॥ ७७॥

तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः। यथा पर्वतो वह्निमान् प्रमेयत्वादिति। अत्र प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात्॥ ७८॥

सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः। यथा शब्दो नित्यः शब्दत्वादिति। अत्र

शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति॥ ७९॥

अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्वस्यापि पक्षत्वाद्दृष्टान्तो नास्ति॥ ८०॥

साध्याभावव्याप्तो हेतुर्विरुद्धः यथा शब्दो नित्यः कृतकत्वाद्घटवदिति। अत्र कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम्॥ ८१॥

साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत्। शब्दोऽनित्यः कार्यत्वाद्घटवत्॥ ८२॥

असिद्धस्त्रिविधः — आश्रयासिद्धः स्वरूपासिद्धो व्याप्यासिद्धश्चेति॥ ८३॥

आश्रयासिद्धो यथा गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः स च नास्त्येव॥ ८४॥

स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात्। अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात्॥ ८५॥

सोपाधिको हेतुर्व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधिः। साध्य-
समानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्। साधनवन्निष्ठात्यन्ताभाव-प्रतियोगित्वं साधनाव्यापकत्वम्। यथा पर्वतो धूमवान् वह्निमत्त्वादित्यत्रार्द्रेन्धन-संयोग उपाधिः। (तथाहि) यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकत्वम्। यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकत्वम्। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः। सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम्॥ ८६॥

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः। यथा वह्निरनुष्णो द्रव्यत्वाइति। अत्राष्णत्वं साध्यः तदभाव उष्णत्वं स्पार्शणप्रत्यक्षेण गृह्यते इति बाधितत्वम्॥ ८७॥

इति अनुमानपरिच्छेदः

Chapter 4

अथोपमानखण्डम्

उपमितिकरणमुपमानम्। संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः। तत्करणं सादृश्यज्ञानम्। तथाहि किञ्चिद्गवयपदार्थमजानन् कुतश्चिदारण्यकपुरुषाद्गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति तदनन्तरमसौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते॥ ८८ ॥

इति उपमितिपरिच्छेदः

Chapter 5

अथ शब्दखण्डम्

आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः, यथा गामानयेति। शक्तं पदम्। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः॥ ८९॥

आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञाने हेतुः। पदस्य पदान्तरव्यतिरेक-प्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा। अर्थाबाधो योग्यता। पदानामविलम्बेनोच्चारणं सन्निधिः। तथा च आकाङ्क्षारहितं वाक्यमप्रमाणं। यथा गौरश्वः पुरुषो हस्तीति न प्रमाणमाकाङ्क्षाविरहात्। वह्निना सिञ्चतीति न प्रमाणं योग्यताविरहात्। प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं सान्निध्याभावात्॥ ९०॥

वाक्यं द्विविधं वैदिकं लौकिकञ्च। वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणम्। लौकिकं त्वाप्तोक्तं प्रमाणम्। अन्यदप्रमाणम्॥ ९१॥

वाक्यार्थज्ञानं शाब्दज्ञानम्। तत्करणं तु शब्दम्॥ ९२॥

इति शब्दपरिच्छेदः

Chapter 6

अथावशिष्टगुणनिरूपनम्

अयथार्थानुभवस्त्रिविधः संशयविपर्ययतर्कभेदात्॥ ९३॥

एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः। यथा स्थाणुर्वा पुरुषो वेति॥ ९४॥

मिथ्याज्ञानं विपर्ययः। यथा शुक्तौ रजतमिति॥ ९५॥

व्याप्यारोपेण व्यापकारोपस्तर्कः। यथा यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति॥ ९६॥

स्मृतिरपि द्विविधा यथार्था अयथार्था च। प्रमाजन्या यथार्था अप्रमाजन्या अयथार्था॥ ९७॥

सर्वेषामनुकूलवेदनीयं सुखम्॥ ९८॥

प्रतिकूलवदनीयं दुःखम्॥ ९९॥

इच्छा कामः। क्रोधो द्वेषः। कृतिः प्रयत्नः॥ १००॥

विहितकर्मजन्यो धर्मः। निषिद्धकर्मजन्यस्त्वधर्मः॥ १०१॥

बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः। बुद्धीछाप्रयत्ना नित्या अनित्याश्च। नित्या ईश्वरस्य अनित्या जीवस्य॥ १०२॥

संकारस्त्रिविधो वेगो भावना स्थितिस्थापकश्चेति। वेगः पृथव्यादिचतुष्टयमनोवृत्तिः।

अनुभवजन्या स्मृतिहेतुर्भावना आत्ममात्रवृत्तिः। अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः कटादिपृथिव्य्वृत्तिरिति गुणाः॥ १०२॥

इत्यवशिष्टगुणनिरूपणम्

Chapter 7

अथ कर्मादिलक्षणप्रकरणम्

चलनात्मकं कर्म। ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपऽनम्। अधोदेशसंयोगहेतुरपक्षेपणम्। शरीरस्य सन्निकृष्टसंयोगहेतुराकुञ्चनम्। विप्रकृष्टसंयोगहेतुः प्रसारणम्। अन्य्त्सर्वं गमनम्॥ १०३॥

नित्यमेकमनेकानुगतं सामान्यम्। द्रव्यगुणकर्मवृत्ति। तद्विविधं परापरभेदात्। परं सत्ता, अपरं द्रव्यत्वादि॥ १०४॥

नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः॥ १०५॥

नित्यसम्बन्धः समवायः। अयुतसिद्धवृत्तिः। ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रितम् एवावतिष्ठते तावयुतसिद्धौ। यथा अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जाति-व्यक्ती विशेषनित्यद्रव्ये चेति॥ १०६॥

अनादिः सान्तः प्रागभाव उत्पत्तेः पूर्वं कार्यस्य॥ १०७॥

सादिरनन्तः प्रध्वंस उत्पत्त्यनन्तरं कार्यस्य॥ १०८॥

त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः। यथा भूतले घटो नास्तीति॥ १०९॥

तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः। यथा घटः पटो नेति॥ ११०॥

सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात् सप्तैव पदार्था इति सिद्धम्॥ ११०॥

इति कर्मादिलक्षणप्रकरणम्

काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नम्भत्तेन विदुषा रचितस्तर्कसङ्ग्रहः ॥ १११॥